# Hanumat Pancharatna Stotram

# हनुमत्पञ्चरत्नस्तोत्रम्

## Document Information

Text title : Hanumat Pancharatna Stotram

File name : hanumatpancharatnastotram.itx

Category : pancharatna, hanumaana, bIjAdyAkSharamantrAtmaka

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran, Ruma Dewan

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Latest update : August 2, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2023

*sanskritdocuments.org*

# हनुमत्पञ्चरत्नस्तोत्रम्

(भगवत्पादानां रामभुजङ्गतः)

शंशंशंसिद्धनाथं प्रणमति चरणं वायुपुत्रं च रौद्रं
वंवंवंविश्वरूपं हहहहहसितं गर्जितं मेघक्षत्रम् । (मेघछत्रम्)
तंतंत्रैलोक्यनाथं तपति दिनकरं तं त्रिनेत्रस्वरूपं
कंकंकन्दर्पवश्यं कमलमनहरं शाकिनीकालरूपम् ॥ १॥

रंरंरंरामदूतं रणगजदमितं रावणच्छेददक्षं
बंबंबंबालरूपं नतगिरिचरणं कम्पितं सूर्यबिम्बम् ।
मंमंमंमन्त्रसिद्धिं कपिकुलतिलकं मर्दनं शाकिनीनां
हुंहुंहुङ्कारबीजं हनति हनुमतं हन्यते शत्रुसैन्यम् ॥ २॥

दंदंदंदीर्घरूपं धरकरशिखरं पातितं मेघनादं
ऊँऊँउच्चाटितं वै सकलभुवतलं योगिनीवृन्दरूपम् ।
क्षंक्षंक्षंक्षिप्रवेगं क्रमति च जलधिं ज्वालितं रक्षदुर्गं
क्षेंक्षेंक्षें क्षेमतत्त्वं दनुरुहकुलं मुच्यते बिम्बकारम् ॥ ३॥

कंकंकंकालदुष्टं जलनिधितरणं राक्षसानां विनाशे
दक्षं श्रेष्ठं कवीनां त्रिभुवनचरतां प्राणिनां प्राणरूपम् ।
ह्रांह्रांह्रांह्रासतत्त्वं त्रिभुवनरचितं दैवतं सर्वभूते
देवानां च त्रयाणां फणिभुवनधरं व्यापकं वायुरूपम् ॥ ४॥

त्वंत्वंत्वंवेदतत्त्वं बहुऋचयजुषं साम चाऽथर्वरूपं
कंकंकंकन्दने त्वं ननु कमलतले राक्षसान् रौद्ररूपान् ।
खंखंखंखड्गहस्तं झटिति भुवितले त्रोटितं नागपाशं
ॐॐॐकाररूपं त्रिभुवनपठितं वेदमन्त्राधिमन्त्रम् ॥ ५॥

सङ्ग्रामे शत्रुमध्ये जलनिधितरणे व्याघ्रसिंहे च सर्पे
राजद्वारे च मार्गे गिरिगुहविवरे चोषरे कन्दरे वा ।
भूतप्रेतादियुक्ते ग्रहगणविषये शाकिनीडाकिनीनां

देशे विस्फोटकानां ज्वरवमनशिरःपीडने नाशकस्त्वम् ॥ ६॥

इति श्रीहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवधर्मस्कन्धान्तर्गतं हनुमत्पञ्चरत्नस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Hanumat Pancharatna Stotram*

pdf was typeset on August 4, 2023

Please send corrections to *sanskrit@cheerful.com*